# श्रीमद् भागवत रसिक कुटुंब

## शिव सहस्रनाम




श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

## शिव सहस्रनाम

**श्री वासुदेव उवाच**

ततः(स्) स प्रयतो भूत्वा, मम तात युधिष्ठिर।
प्राञ्जलिः(फ्) प्राह विप्रर्षि-र्नामसंग्रहमादितः ॥ 1 ॥

**उपमन्युरुवाच**

ब्रह्मप्रोक्तैर्ऋषिप्रोक्तै-र्वेदवेदाङ्गसम्भवैः।
सर्वलोकेषु विख्यातं(म्), स्तुत्यं(म्) स्तोष्यामि नामभिः ॥ 2 ॥

महद्भिर्विहितैः(स्) सत्यैः(स्), सिद्धैः(स्) सर्वार्थ साधकैः।
ऋषिणा तण्डिना भक्त्या, कृतैर्वेदकृतात्मना ॥ 3 ॥

यथोक्तैः(स्) साधुभिः(ख्), ख्यातैर्मुनिभिस्तत्त्वदर्शिभिः।
प्रवरं(म्) प्रथमं स्वर्ग्यं(म्), सर्वभूतहितं(म्) शुभम् ॥ 4 ॥

श्रुतैः(स्) सर्वत्र जगति, ब्रह्मलोकावतारितैः।
सत्यैस्तत् परमं(म्) ब्रह्म, ब्रह्मप्रोक्तं(म्) सनातनम् ॥ 5 ॥

वक्ष्ये यदुकुलश्रेष्ठ, श्रृणुष्वावहितो मम।
वरयैनं(म्) भवं(न्) देवं(न्), भक्तस्त्वं(म्) परमेश्वरम् ॥ 6॥

तेन ते श्रवयिष्यामि, यत् तद् बह्म सनातनम्।
न शक्यं(म्) विस्तरात् कृत्स्नं(म्), वक्तुं(म्) सर्वस्व केनचित् ॥ 7 ॥

युक्तेनापि विभूती-नापि वर्षशतैरपि।
यस्यादिर्मध्यमन्तं(ञ्), च सुरैरपि न गम्यते ॥ 8 ॥

कस्तस्य शक्नुयाद् वक्तुं(ङ्), गुणान् कार्त्स्न्येन माधव।
किं तु देवस्य महतः(स्), सं क्षिप्तार्थपदाक्षरम् ॥ 9 ॥

शक्तितश्चरितं(म्) वक्ष्ये, प्रसादात् तस्य धीमतः।
अप्राप्य तु ततोऽनुज्ञां(न्) न, शक्यः(स्) स्तोतुमीश्वरः ॥ 10 ॥

यदा तेनाभ्यनुज्ञातः(स्), स्तुतो वै स तथा मया।
अनादिनिधनस्याहं(ञ्), जगद्योनेर्महात्मनः ॥ 11 ॥

नाम्नां(ङ्) कञ्चित् समुद्देशं(म्), वक्ष्याम्यव्यक्तयोनिनः।
वरदस्य वरेण्यस्य, विश्वरूपस्य धीमतः ॥ 12 ॥

श्रृणु नाम्नां(ञ्) च यं(ङ्) कृष्ण, यदुक्तं(म्) पद्मयोनिना।
दशनामसहस्राणि, यान्याह प्रपितामहः ॥ 13 ॥

तानि निर्मथ्य मनसा, दध्नो घृतमिवोद्धृतम्।
गिरेः(स्) सारं(म्) यथा हेम, पुष्पसारं(म्) यथा मधु ॥ 14 ॥

घृतात् सारं(म्) यथा मण्ड-स्तथैतत् सारमुद्धृतम्।
सर्वपापापहमिदं(ञ्), चतुर्वेदसमन्वितम् ॥ 15 ॥

प्रयत्नेनाधिगन्तव्यं(न्), धार्यं(ञ्) च प्रयतात्मना।
माङ्गल्यं(म्) पौष्टिकं(ञ्) चैव, रक्षोघ्नं(म्) पावनं(म्) महत् ॥ 16 ॥

इदं(म्) भक्ताय दातव्यं(म्), श्रद्दधानास्तिकाय च।
नाश्रद्दधानरूपाय, नास्तिकायाजितात्मने ॥ 17 ॥

यश्चाभ्यसूयते देवं(ङ्), कारणात्मानमीश्वरम्।
स कृष्ण नरकं(म्) याति, सह पूर्वैः(स्) सहात्मजैः ॥ 18 ॥

इदं(न्) ध्यानमिदं(म्) योग-मिदं(न्) ध्येयमनुत्तमम्।
इदं(ञ्) जप्यमिदं(ञ्) ज्ञानं(म्), रहस्यमिदमुत्तम् ॥ 19 ॥

यं(ञ्) ज्ञात्वा अन्तकालेऽपि, गच्छेत परमां(ङ्) गतिम्।
पवित्रं(म्) मङ्गलं(म्) मेध्यं(ङ्), कल्याणमिदमुत्तमम् ॥ 20 ॥

इदं(म्) ब्रह्मा पुरा कृत्वा, सर्वलोकपितामहः।
सर्वस्तवानां(म्) राजत्वे, दिव्यानां(म्) समकल्पयत् ॥ 21 ॥

तदा प्रभृति चैवाय-मीश्वरस्य महात्मनः।
स्तवराज इति ख्यातो, जगत्यमरपूजितः ॥ 22॥

ब्रह्मलोकादयं(म्) स्वर्गे, स्तवराजोऽवतारितः।
यतस्तण्डिः(फ्) पुरा प्राप, तेन तण्डिकृतोऽभवत् ॥ 23 ॥

स्वर्गाच्चैवात्र भूर्लोकं(न्), तण्डिना ह्यवतारितः।
सर्वमङ्गलमाङ्गल्यं(म्), सर्व पापप्रणाशनम् ॥ 24 ॥

**निगदिष्ये महाबाहो, स्तवानामुत्तमं(म्) स्तवम्।**
**ब्रह्मणामपि यद् ब्रह्म, पराणामपि यत् परम् ॥ 25॥**

**तेजसामपि यत् तजस्- तपसामपि यत् तपः।**
**शान्तानामपि यः(श्) शान्तो, द्युतीनामपि या द्युतिः ॥ 26 ॥**

**दान्तानामपि यो दान्तो, धीमतामपि या च धीः।**
**देवानामपि यो देव, ऋषीणामपि यस्त्वृषिः ॥ 27 ॥**

**यज्ञानामपि यो यज्ञः(श्), शिवानामपि यः(श्) शिवः।**
**रुद्राणामपि यो रुद्रः(फ्), प्रभा प्रभवतामपि ॥ 28 ॥**

**योगिनामपि यो योगी, कारणानां(ञ्) च कारणम्।**
**यतो लोकाः(स्) सम्भवन्ति, न भवन्ति यतः(फ्) पुनः ॥ 29 ॥**

**सर्वभूतात्मभूतस्य, हरस्यामिततेजसः।**
**अष्टोत्तरसहस्रं(न्) तु ,नाम्नां(श्) शर्वस्य मे श्रृणु।**
**यच्छ्उत्वा मनुजव्याघ्र, सर्वान् कामानवाप्स्यसि ॥ 30 ॥**

**ॐ अस्य श्री सदाशिवसहस्रनामस्तोत्र महामन्त्रस्य।**
**उपमन्यु ऋषिः।अननुष्टुप् छन्दः।श्री सांबसदाशिवो देवता।**
**स्थिरः(स्) स्थाणुऋति बीजम्।श्रीमान् श्रीवर्धनो जगदिति शक्तिः।**
**देवाधिपति ऋति कीलकम्।**
**श्री सांबसदाशिव प्रसाद सिध्यर्थे पारायणे विनियोगः ॥**

**ध्यानम्**

**ध्यायेन्नित्यं(म्) महेशं(म्) रजतगिरिनिभं(ञ्) चारुचन्द्रावतंसं(म्)**
**रत्नाकल्पोज्ज्वलाङ्ग परशुमृगवराभीतिहस्तं(म्) प्रसन्नम्।**

पद्मासीनं(म्) समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वहां(म्)
विश्वाद्यं(म्) विश्वबज्जं(न्) निखिलभयहरं(म्) पञ्चवक्त्रं(न्) त्रिनेत्रम् ॥
शान्तं(म्) पद्मासनस्थं(म्) शशिधरमकुटं(म्) पञ्चवक्त्रं(न्) त्रिनेत्रं(म्)
शूलं(म्) वज्रं(ञ्) च खड्ग(म्) परशुमभयदं(न्) दक्षभागे वहन्तम्।
नागं(म्) पाशं(ञ्) च घण्टां(म्) प्रलयहुतवहं(म्) साङ्कुशं(म्) वामभागे
नानालंङ्कारयुक्तं(म्) स्फटिकमणिनिभं(म्) पार्वतीशं(न्) नमामि ॥

## अथ सहस्रनामस्तोत्रम्

ॐ स्थिरः(स्) स्थाणुः(फ्) प्रभुर्भीमः(फ्),प्रवरो वरदो वरः ।
सर्वात्मा सर्वविख्यातः(स्), सर्वः(स्) सर्वकरो भवः ॥ 1 ॥

जटी चर्मी शिखण्डी च, सर्वाङ्गः(स्) सर्वभावनः ।
हरश्च हरिणाक्षश्च, सर्वभूतहरः(फ्) प्रभुः ॥ 2 ॥

प्रवृत्तिश्च निवृत्तिश्च, नियतः(श्) शाश्वतो ध्रुवः ।
श्मशानवासी भगवान्, खचरो गोचरोऽर्दनः ॥ 3 ॥

अभिवाद्यो महाकर्मा, तपस्वी भूतभावनः ।
उन्मत्तवेषप्रच्छन्नः(स्), सर्वलोकप्रजापतिः ॥ 4 ॥

महारूपो महाकायो, वृषरूपो महायशाः ।
महात्मा सर्वभूतात्मा, विश्वरूपो महाहनुः ॥ 5 ॥

लोकपालोऽन्तर्हितात्मा, प्रसादो हयगर्दभिः ।
पवित्रं(ञ्) च महांश्चैव, नियमो नियमाश्रितः ॥ 6 ॥

सर्वकर्मा स्वयम्भूत, आदिरादिकरो निधिः ।
सहस्राक्षो विशालाक्षः(स्), सोमो नक्षत्रसाधकः ॥ 7 ॥

चन्द्रः(स्) सूर्यः(श्) शनिः(ख्) केतुर्-ग्रहो ग्रहपतिर्वरः ।
अत्रिरत्र्या नमस्कर्ता, मृगबाणार्पणोऽनघः ॥ 8 ॥

महातपा घोरतपा, अदीनो दीनसाधकः ।
संवत्सरकरो मन्त्रः(फ्), प्रमाणं(म्) परमं(न्) तपः ॥ 9 ॥

योगी योज्यो महाबीजो, महारेता महाबलः ।
सुवर्ण-रेताः(स्) सर्वज्ञः(स्), सुबीजो बीजवाहनः ॥ 10 ॥

दशबाहुस्त्वनिमिषो, नीलकण्ठ उमापतिः ।
विश्वरूपः(स्) स्वयं(म्) श्रेष्ठो, बलवीरोऽबलो गणः ॥ 11 ॥

गणकर्ता गणपतिर्-दिग्वासाः(ख्) काम एव च ।
मन्त्रवित् परमो मन्त्रः(स्), सर्वभावकरो हरः ॥ 12 ॥

कमण्डलुधरो धन्वी, बाणहस्तः(ख्) कपालवान् ।
अशनी शतघ्नी खड्गी, पट्टिशी चायुधी महान् ॥ 13 ॥

स्रुवहस्तः(स्) सुरूपश्च, तेजस्तेजस्करो निधिः ।
उष्णीषी च सुवक्त्रश्च, उदग्रो विनतस्तथा ॥ 14 ॥

दीर्घश्च हरिकेशश्च, सुतीर्थः(ख्) कृष्ण एव च ।
शृगालरूपः(स्) सिद्धार्थो, मुण्डः(स्) सर्वशुभङ्करः ॥ 15 ॥

अजश्च बहुरूपश्च, गन्धधारी कपर्द्यपि ।
ऊर्ध्वरेता ऊर्ध्वलिङ्ग, ऊर्ध्वशायी नभः(स्) स्थलः ॥ 16 ॥

त्रिजटी चीरवासाश्च, रुद्रः(स्) सेनापतिर्विभुः ।
अहश्चरो नक्तञ्चर-स्तिग्ममन्युः(स्) सुवर्चसः ॥ 17 ॥

गजहा दैत्यहा कालो, लोकधाता गुणाकरः ।
सिंहशार्दूलरूपश्च, आर्द्रचर्माम्बरावृतः ॥ 18 ॥

कालयोगी महानादः(स्), सर्वकामश्चतुष्पथः ।
निशाचरः(फ्) प्रेतचारी, भूतचारी महेश्वरः ॥ 19 ॥

बहुभूतो बहुधरः(स्), स्वर्भानुरमितो गतिः ।
नृत्यप्रियो नित्यनर्तो, नर्तकः(स्) सर्वलालसः ॥ 20 ॥

घोरो महातपाः(फ्) पाशो, नित्यो गिरिरुहो नभः ।
सहस्रहस्तो विजयो, व्यवसायो ह्यतन्द्रितः ॥ 21 ॥

अधर्षणो धर्षणात्मा, यज्ञहा कामनाशकः ।
दक्षयागापहारी च,सुसहो मध्यमस्तथा ॥ 22 ॥

तेजोपहारी बलहा,मुदितोऽर्थोऽजितो वरः ।
गम्भीरघोषो गम्भीरो, गम्भीरबलवाहनः ॥ 23 ॥

न्यग्रोधरूपो न्यग्रोधो, वृक्षकर्णस्थितिर्विभुः ।
सुतीक्ष्णदशनश्चैव, महाकायो महाननः ॥ 24 ॥

विष्वक्सेनो हरिर्यज्ञः(स्), संयुगापीडवाहनः ।
तीक्ष्णतापश्च हर्यश्वः(स्), सहायः(ख्) कर्मकालवित् ॥ 25 ॥

विष्णुप्रसादितो यज्ञः(स्), समुद्रो वडवामुखः ।
हुताशनसहायश्च, प्रशान्तात्मा हुताशनः ॥ 26 ॥

उग्रतेजा महातेजा, जन्यो विजयकालवित् ।
ज्योतिषामयनं(म्) सिद्धिः(स्), सर्वविग्रह एव च ॥ 27 ॥

शिखी मुण्डी जटी ज्वाली, मूर्तिजो मूर्द्धगो बली ।
वेणवी पणवी ताली, खली कालकटङ्कटः ॥ 28 ॥

नक्षत्रविग्रहमतिर्- गुऽणबुद्धिर्लयोऽगमः ।
प्रजापतिर्विश्वबाहुर्-विभागः(स्) सर्वगोऽमुखः ॥ 29 ॥

विमोचनः(स्) सुसरणो, हिरण्यकवचोद्भवः ।
मेढ्रजो बलचारी च, महीचारी स्रुतस्तथा ॥ 30 ॥

सर्वतूर्यनिनादी च, सर्वातोद्यपरिग्रहः ।
व्यालरूपो गुहावासी, गुहो माली तरङ्गवित् ॥ 31 ॥

त्रिदशस्त्रिकालधृक् कर्म-सर्वबन्धविमोचनः ।
बन्धनस्त्वसुरेन्द्राणां(य्), युधि शत्रुविनाशनः ॥ 32 ॥

साङ्ख्यप्रसादो दुर्वासाः(स्), सर्वसाधुनिषेवितः ।
प्रस्कन्दनो विभागज्ञोऽ-तुल्यो यज्ञविभागवित् ॥ 33 ॥

सर्ववासः(स्) सर्वचारी, दुर्वासा वासवोऽमरः ।
हैमो हेमकरोऽयज्ञः(स्), सर्वधारी धरोत्तमः ॥ 34 ॥

लोहिताक्षो महाक्षश्च, विजयाक्षो विशारदः ।
सङ्ग्रहो निग्रहः(ख्) कर्ता, सर्पचीरनिवासनः ॥ 35 ॥

मुख्योऽमुख्यश्च देहश्च, काहलिः(स्) सर्वकामदः ।
सर्वकालप्रसादश्च, सुबलो बलरूपधृक् ॥ 36 ॥

सर्वकामवरश्चैव, सर्वदः(स्) सर्वतोमुखः ।
आकाशनिर्विरूपश्च, निपाती ह्यवशः(ख्) खगः ॥ 37 ॥

रौद्ररूपोंऽशुरादित्यो,बहुरश्मिः(स्) सुवर्चसी ।
वसुवेगो महावेगो, मनोवेगो निशाचरः ॥ 38 ॥

सर्ववासी श्रियावासी, उपदेशकरोऽकरः ।
मुनिरात्मनिरालोकः(स्), सम्भग्नश्च सहस्रदः ॥ 39 ॥

पक्षी च पक्षरूपश्च, अतिदीप्तो विशाम्पतिः ।
उन्मादो मदनः(ख्) कामो, ह्यश्वत्थोऽर्थकरो यशः ॥ 40 ॥

वामदेवश्च वामश्च, प्राग् दक्षिणश्च वामनः ।
सिद्धयोगी महर्षिश्च, सिद्धार्थः(स्) सिद्धसाधकः ॥ 41 ॥

भिक्षुश्च भिक्षुरूपश्च, विपणो मृदुरव्ययः ।
महासेनो विशाखश्च, षष्टिभागो गवां(म्) पतिः ॥ 42 ॥

वज्रहस्तश्च विष्कम्भी, चमूस्तम्भन एव च ।
वृत्तावृत्तकरस्तालो, मधुर्मधुकलोचनः ॥ 43 ॥

वाचस्पत्यो वाजसनो, नित्याश्रमपूजितः ।
ब्रह्मचारी लोकचारी, सर्वचारी विचारवित् ॥ 44 ॥

ईशान ईश्वरः(ख्) कालो, निशाचारी पिनाकवान् ।
निमित्तस्थो निमित्तं(ञ्) च, नन्दिर्नन्दिकरो हरिः ॥ 45 ॥

नन्दीश्वरश्च नन्दी च, नन्दनो नन्दिवर्धनः ।
भगहारी निहन्ता च, कालो ब्रह्मा पितामहः ॥ 46 ॥

चतुर्मुखो महालिङ्गश्-चारुलिङ्गस्तथैव च ।
लिङ्गाध्यक्षः(स्) सुराध्यक्षो, योगाध्यक्षो युगावहः ॥ 47 ॥

बीजाध्यक्षो बीजकर्ता, अध्यात्मानुगतो बलः ।
इतिहासः(स्)सकल्पश्च, गौतमोऽथ निशाकरः ॥ 48 ॥

दम्भो ह्यदम्भो वैदम्भो, वश्यो वशकरः(ख्) कलिः ।
लोककर्ता पशुपतिर्-महाकर्ता ह्यनौषधः ॥ 49 ॥

अक्षरं(म्) परमं(म्) ब्रह्म, बलवच्छक्र एव च ।
नीतिर्ह्यनीतिः(श्) शुद्धात्मा, शुद्धो मान्यो गतागतः ॥ 50 ॥

बहुप्रसादः(स्) सुस्वप्नो, दर्पणोऽथ त्वमित्रजित् ।
वेदकारो मन्त्रकारो, विद्वान् समरमर्दनः ॥ 51 ॥

महामेघनिवासी च, महाघोरो वशी करः ।
अग्निज्वालो महाज्वालो, अतिधूम्रो हुतो हविः ॥ 52 ॥

वृषणः(श्) शङ्करो नित्यं, वर्चस्वी धूमकेतनः ।
नीलस्तथाऽङ्गलुब्धश्च, शोभनो निरवग्रहः ॥ 53 ॥

स्वस्तिदः(स्) स्वस्तिभावश्च, भागी भागकरो लघुः ।
उत्सङ्गश्च महाङ्गश्च, महागर्भपरायणः ॥ 54 ॥

कृष्णवर्णः(स्) सुवर्णश्च, इन्द्रियं सर्वदेहिनाम् ।
महापादो महाहस्तो, महाकायो महायशाः ॥ 55 ॥

महामूर्धा महामात्रो, महानेत्रो निशालयः ।
महान्तको महाकर्णो, महोष्ठश्च महाहनुः ॥ 56 ॥

महानासो महाकम्बुर्-महाग्रीवः(श्) श्मशानभाक् ।
महावक्षा महोरस्को- ह्यन्तरात्मा मृगालयः ॥ 57 ॥

लम्बनो लम्बितोष्ठश्च, महामायः(फ्) पयोनिधिः ।
महादन्तो महादंष्ट्रो, महाजिह्वो महामुखः ॥ 58 ॥

महानखो महारोमा, महाकोशो महाजटः ।
प्रसन्नश्च प्रसादश्च, प्रत्ययो गिरिसाधनः ॥ 59 ॥

स्नेहनोऽस्नेहनश्चैव, अजितश्च महामुनिः ।
वृक्षाकारो वृक्षकेतु-रनलो वायुवाहनः ॥ 60 ॥

गण्डली मेरुधामा च, देवाधिपतिरेव च ।
अथर्वशीर्षः(स्) सामास्य, ऋक्सहस्रामितेक्षणः ॥ 61 ॥

यजुः(फ्) पादभुजो गुह्यः(फ्), प्रकाशो जङ्गमस्तथा ।
अमोघार्थः(फ्) प्रसादश्च, अभिगम्यः(स्) सुदर्शनः ॥ 62 ॥

उपकारः(फ्) प्रियः सर्वः(ख्), कनकः(ख्) काञ्चनच्छविः ।
नाभिर्नन्दिकरो भावः(फ्), पुष्करस्थपतिः(स्) स्थिरः ॥ 63 ॥

द्वादशस्त्रासनश्चाद्यो, यज्ञो यज्ञसमाहितः ।
नक्तं कलिश्च कालश्च, मकरः(ख्) कालपूजितः ॥ 64 ॥

सगणो गणकारश्च, भूतवाहनसारथिः ।
भस्मशयो भस्मगोप्ता, भस्मभूतस्तरुर्गणः ॥ 65 ॥

लोकपालस्तथालोको, महात्मा सर्वपूजितः ।
शुक्लस्त्रिशुक्लः(स्) सम्पन्नः(श्), शुचिर्भूतनिषेवितः ॥ 66 ॥

आश्रमस्थः(ख्) क्रियावस्थो, विश्वकर्ममतिर्वरः ।
विशालशाखस्ताम्रोष्ठो, ह्यम्बुजालः(स्) सुनिश्चलः ॥ 67 ॥

कपिलः(ख्) कपिशः(श्), शुक्ल आयुश्चैव परोऽपरः ।
गन्धर्वो ह्यदितिस्तार्क्ष्यः(स्), सुविज्ञेयः(स्) सुशारदः ॥ 68 ॥

परश्वधायुधो देवो, अनुकारी सुबान्धवः ।
तुम्बवीणो महाक्रोध, ऊर्ध्वरेता जलेशयः ॥ 69 ॥

उग्रो वंशकरो वंशो, वंशनादो ह्यनिन्दितः ।
सर्वाङ्गरूपो मायावी, सुहृदो ह्यनिलोऽनलः ॥ 70 ॥

बन्धनो बन्धकर्ता च, सुबन्धनविमोचनः ।
सयज्ञारिः(स्) स कामारिर्- महादंष्ट्रो महायुधः ॥ 71 ॥

बहुधा निन्दितः(श्) शर्वः(श्), शङ्करः(श्) शङ्करोऽधनः ।
अमरेशो महादेवो, विश्वदेवः(स्) सुरारिहा ॥ 72 ॥

अहिर्बुध्न्योऽनिलाभश्च, चेकितानो हविस्तथा ।
अजैकपाच्च कापाली, त्रिशङ्कुरजितः(श्) शिवः ॥ 73 ॥

धन्वन्तरिर्धूमकेतुः(स्), स्कन्दो वैश्रवणस्तथा ।
धाता शक्रश्च विष्णुश्च, मित्रस्त्वष्टा ध्रुवो धरः ॥ 74 ॥

प्रभावः(स्) सर्वगो वायु-रर्यमा सविता रविः ।
उषङ्गुश्च विधाता च, मान्धाता भूतभावनः ॥ 75 ॥

विभुर्वर्णविभावी च, सर्वकामगुणावहः ।
पद्मनाभो महागर्भश्- चन्द्रवक्त्रोऽनिलोऽनलः ॥ 76 ॥

बलवांश्चोपशान्तश्च, पुराणः(फ्) पुण्यचञ्चुरी ।
कुरुकर्ता कुरुवासी, कुरुभूतो गुणौषधः ॥ 77 ॥

सर्वाशयो दर्भचारी, सर्वेषां(म्) प्राणिनां पतिः ।
देवदेवः(स्) सुखासक्तः(स्), सदसत्सर्वरत्नवित् ॥ 78 ॥

कैलासगिरिवासी च, हिमवद्गिरिसंश्रयः ।
कूलहारी कूलकर्ता, बहुविद्यो बहुप्रदः ॥ 79 ॥

वणिजो वर्धकी वृक्षो, वकुलश्चन्दनश्छदः ।
सारग्रीवो महाजत्रु-रलोलश्च महौषधः ॥ 80 ॥

सिद्धार्थकारी सिद्धार्थश्- छन्दोव्याकरणोत्तरः ।
सिंहनादः(स्) सिंहदंष्ट्रः(स्), सिंहगः(स्) सिंहवाहनः ॥ 81 ॥

प्रभावात्मा जगत्कालस्-थालो लोकहितस्तरुः ।
सारङ्गो नवचक्राङ्गः(ख्), केतुमाली सभावनः ॥ 82 ॥

भूतालयो भूतपति-रहोरात्रमनिन्दितः ॥ 83 ॥

वाहिता सर्वभूतानां(न्), निलयश्च विभुर्भवः ।
अमोघः(स्) संयतो ह्यश्वो, भोजनः(फ्) प्राणधारणः ॥ 84 ॥

धृतिमान् मतिमान् दक्षः(स्), सत्कृतश्च युगाधिपः ।
गोपालिर्गोपतिर्ग्रामो, गोचर्मवसनो हरिः ॥ 85 ॥

हिरण्यबाहुश्च तथा, गुहापालः(फ्) प्रवेशिनाम् ।
प्रकृष्टारिर्महाहर्षो, जितकामो जितेन्द्रियः ॥ 86 ॥

गान्धारश्च सुवासश्च, तपः(स्)सक्तो रतिर्नरः ।
महागीतो महानृत्यो, ह्यप्सरोगणसेवितः ॥ 87 ॥

महाकेतुर्महाधातुर्-नैकसानुचरश्चलः ।
आवेदनीय आदेशः(स्), सर्वगन्धसुखावहः ॥ 88 ॥

तोरणस्तारणो वातः(फ्), परिधीपतिखेचरः ।
संयोगो वर्धनो वृद्धो, अतिवृद्धो गुणाधिकः ॥ 89 ॥

नित्य आत्मसहायश्च, देवासुरपतिः(फ्) पतिः ।
युक्तश्च युक्तबाहुश्च, देवो दिविसुपर्वणः ॥ 90 ॥

आषाढश्च सुषाढश्च, ध्रुवोऽथ हरिणो हरः ।
वपुरावर्तमानेभ्यो, वसुश्रेष्ठो महापथः ॥ 91 ॥

शिरोहारी विमर्शश्च, सर्वलक्षणलक्षितः ।
अक्षश्च रथयोगी च, सर्वयोगी महाबलः ॥ 92 ॥

समाम्नायोऽसमाम्नायस्-तीर्थदेवो महारथः ।
निर्जीवो जीवनो मन्त्रः(श्), शुभाक्षो बहुकर्कशः ॥ 93 ॥

रत्नप्रभूतो रक्ताङ्गो, महार्णवनिपानवित् ।
मूलं(म्) विशालो ह्यमृतो, व्यक्ताव्यक्तस्तपोनिधिः ॥ 94 ॥

आरोहणोऽधिरोहश्च, शीलधारी महायशाः ।
सेनाकल्पो महाकल्पो, योगो योगकरो हरिः ॥ 95 ॥

युगरूपो महारूपो, महानागहनो वधः ।
न्यायनिर्वपणः पादः(फ्), पण्डितो ह्यचलोपमः ॥ 96 ॥

बहुमालो महामालः(श्), शशी हरसुलोचनः ।
विस्तारो लवणः(ख्) कूपस्-त्रियुगः(स्) सफलोदयः ॥ 97 ॥

त्रिलोचनो विषण्णाङ्गो, मणिविद्धो जटाधरः ।
बिन्दुर्विसर्गः(स्) सुमुखः(श्), शरः(स्) सर्वायुधः(स्) सहः ॥ 98 ॥

निवेदनः(स्) सुखाजातः(स्), सुगन्धारो महाधनुः ।
गन्धपाली च भगवा-नुत्थानः(स्) सर्वकर्मणाम् ॥ 99 ॥

मन्थानो बहुलो वायुः(स्), सकलः(स्) सर्वलोचनः ।
तलस्तालः(ख्) करस्थाली, ऊर्ध्वसंहननो महान् ॥ 100 ॥

छत्रं(म्) सुच्छत्रो विख्यातो, लोकः(स्) सर्वाश्रयः(ख्) क्रमः ।
मुण्डो विरूपो विकृतो, दण्डी कुण्डी विकुर्वणः ॥ 101 ॥

हर्यक्षः(ख्) ककुभो वज्री, शतजिह्वः(स्) सहस्रपात् ।
सहस्रमूर्धा देवेन्द्रः(स्), सर्वदेवमयो गुरुः ॥ 102 ॥

सहस्रबाहुः(स्) सर्वाङ्गः(श्), शरण्यः(स्) सर्वलोककृत् ।
पवित्रं(न्) त्रिककुन्मन्त्रः(ख्), कनिष्ठः(ख्) कृष्णपिङ्गलः ॥ 103 ॥

ब्रह्मदण्डविनिर्माता, शतघ्नीपाशशक्तिमान् ।
पद्मगर्भो महागर्भो, ब्रह्मगर्भो जलोद्भवः ॥ 104 ॥

गभस्तिर्ब्रह्मकृद् ब्रह्मी, ब्रह्मविद् ब्राह्मणो गतिः ।
अनन्तरूपो नैकात्मा, तिग्मतेजाः(स्) स्वयम्भुवः ॥ 105 ॥

ऊर्ध्वगात्मा पशुपतिर्-वातरंहा मनोजवः ।
चन्दनी पद्मनालाग्रः(स्), सुरभ्युत्तरणो नरः ॥ 106 ॥

कर्णिकारमहास्रग्वी नील, मौलिः(फ्) पिनाकधृत् ।
उमापतिरुमाकान्तो, जाह्नवीधृदुमाधवः ॥ 107 ॥

वरो वराहो वरदो, वरेण्यः(स्) सुमहास्वनः ।
महाप्रसादो दमनः(श्), शत्रुहा श्वेतपिङ्गलः ॥ 108 ॥

पीतात्मा परमात्मा च, प्रयतात्मा प्रधानधृत् ।
सर्वपार्श्वमुखस्त्र्यक्षो, धर्मसाधारणो वरः ॥ 109 ॥

चराचरात्मा सूक्ष्मात्मा, अमृतो गोवृषेश्वरः ।
साध्यर्षिर्वसुरादित्यो, विवस्वान् सविताऽमृतः ॥ 110 ॥

व्यासः(स्) सर्गः(स्) सुसङ्क्षेपो, विस्तरः पर्ययो नरः ।
ऋतुः(स्) संवत्सरो माक्षः(स्), पक्षः सङ्ख्यासमापनः ॥ 111 ॥

कलाः(ख्) काष्ठा लवा मात्रा, मुहूर्ताहः(ह्)क्षपाः(ह्) क्षणाः ।
विश्वक्षेत्रं(म्) प्रजाबीजं(म्), लिङ्गमाद्यस्तु निर्गमः ॥ 112 ॥

सदसद् व्यक्तमव्यक्तं(म्), पिता माता पितामहः ।
स्वर्गद्वारं(म्) प्रजाद्वारं(म्), मोक्षद्वारं(न्) त्रिविष्टपम् ॥ 113 ॥

निर्वाणं(म्) ह्लादनश्चैव, ब्रह्मलोकः(फ्) परा गतिः ।
देवासुरविनिर्माता, देवासुरपरायणः ॥ 114 ॥

देवासुरगुरुर्देवो, देवासुरनमस्कृतः ।
देवासुरमहामात्रो, देवासुरगणाश्रयः ॥ 115 ॥

देवासुरगणाध्यक्षो, देवासुरगणाग्रणीः ।
देवादिदेवो देवर्षिर्-देवासुरवरप्रदः ॥ 116 ॥

देवासुरेश्वरो विश्वो, देवासुरमहेश्वरः ।
सर्वदेवमयोऽचिन्त्यो, देवतात्माऽऽत्मसम्भवः ॥ 117 ॥

उद्भित्  त्रिविक्रमो वैद्यो, विरजो नीरजोऽमरः ।
ईड्यो हस्तीश्वरो व्याघ्रो, देवसिंहो नरर्षभः ॥ 118 ॥

विबुधोऽग्रवरः(स्) सूक्ष्मः(स्), सर्वदेवस्तपोमयः ।
सुयुक्तः(श्) शोभनो वज्री, प्रासानां प्रभवोऽव्ययः ॥ 119 ॥

गुहः(ख्) कान्तो निजः(स्) सर्गः(फ्), पवित्रं(म्) सर्वपावनः ।
शृङ्गी शृङ्गप्रियो बभ्रू , राजराजो निरामयः ॥ 120 ॥

अभिरामः(स्) सुरगणो, विरामः(स्) सर्वसाधनः ।
ललाटाक्षो विश्वदेवो, हरिणो ब्रह्मवर्चसः ॥ 121 ॥

स्थावराणां पतिश्चैव, नियमेन्द्रियवर्धनः ।
सिद्धार्थः(स्) सिद्धभूतार्थोऽचिन्त्यः, सत्यव्रतः(श्) शुचिः ॥ 122 ॥

व्रताधिपः(म्) परं(म्) ब्रह्म, भक्तानां परमा गतिः।
विमुक्तो मुक्ततेजाश्च, श्रीमान् श्रीवर्धनो जगत् ॥ 123 ॥

## फलश्रुति

यथाप्रधानं(म्) भगवानिति, भक्त्या स्तुतो मया।
यन्ना ब्रह्मादयो देवा, विदुस्तत्त्वेन नर्षयः ॥

स्तोतव्यमर्च्यं(म्) वन्द्यं(ञ्) च, कः(स्) स्तोष्यति जगत्पतिम्।
भक्त्या त्वेवं(म्) पुरस्कृत, मया यज्ञपतिर्विभुः ॥

ततोऽभ्यनुज्ञां(म्) सम्प्राप्य, स्तुतो मतिमतां(म्) वरः।
शिवमेभिः स्तुवन् देवं(न्), नामभिः(फ) पुष्टिवर्धनैः ॥

एतद्धि परमं(म्) ब्रह्म, परं(म्) ब्रह्माधिगच्छति।
ऋषयश्चैव देवाश्च, स्तुवन्त्येतेन तत्परम् ॥

स्तूयमानो महादेव-स्तुष्यते नियतात्मभिः।
भक्तानुकम्पी भगवा-नात्मसंस्थाकरो विभुः ॥

तथैव च मनुष्येषु ये, मनुष्याः(फ्) प्रधानतः।
आस्तिकताः(श्) श्रद्धधानाश्च, बहुभिर्जन्मभिः(स्) स्तवैः ॥

भक्त्या ह्यनन्यमीशानं(म्) परं(न्), देवन(म्) सनातनम्।
कर्मणा मनसा वाचा, भावेनामिततेजसः ॥

शयाना जाग्रमाणाश्च, व्रजन्नुपविशंस्तथा।
उन्मिषन् निमिषंश्चैव, चिन्तयन्तः(फ्) पुनः(फ्) पनः ॥

श्रृण्वन्तः(श्) श्रावयन्तश्च, कथयन्तश्च ते भवम्।
स्तुवन्तः(स्) स्तूयमानाश्च, तुष्यन्ति च रमन्ति च ॥

जन्मकोटिसहस्रेषु, नानासंसारयोनिषु।
जन्तोर्विगतपापस्य भवे, भक्तिः(फ्) प्रजायते ॥

उत्पन्ना च भवे भक्ति-रनन्या सर्वमान्यः।
भाविनः(ख्) कारणे चास्य, सर्वयुक्तस्य सर्वथा ॥

एतद् देवेषु दुष्प्रापं(म्), मनुष्येषु न लभ्यते।
निर्विघ्ना निश्चला रुद्रे, भक्तिरव्यभिचारिणी ॥

तस्यैव च प्रसादेन, भक्तिरुत्पद्यते नृणाम्।
येन यान्ति परां(म्), सिद्धिं(न्) तद्भागवतचेतसः ॥

ये सर्वभावानुगताः(फ्), प्रपद्यन्ते महेश्वरम्।
प्रपन्नवत्सलो देवः(स्), संसारात् तान् समुद्धरेत् ॥

एवमन्ये विकुर्वन्ति, देवाः(स्) संसारमोचनम् ।
मनुष्याणामृते देवं(न्), नान्या शक्तिस्तपोबलम् ॥

इति तेनेन्द्रकल्पेन, भगवान् सदसत्पतिः।
कृत्तिवासाः(स्) स्तुतः(ङ्) कृष्ण, तण्डिना शुभबुद्धिना ॥

स्तवमेतं(म्) भगवतो, ब्रह्मा स्वयमधारयत्।
गीयते च स बुद्ध्येत, ब्रह्मा शंकरसन्निधौ ॥

इदं(म्) पुण्यं(म्) पवित्रं(ञ्) च, सर्वदा पापनाशनम्।
योगदं(म्) मोक्षदं(ञ्)चैव, स्वर्गदं(न्) तोषदं(न्) तथा ॥

एवमेतत् पठन्ते य एक-भक्त्या तु शङ्करम्।
या गतिः(स्) सांख्ययोगानां(म्), व्रजन्त्येतां(ङ्) गतिं(न्) तदा ॥

स्तवमेतं(म्) प्रयत्नेन, सदा रुद्रस्य सन्निधौ।
अब्दमेकं(ञ्) चरेद् भक्तः(फ्), प्राप्नुयादीप्सितं(म्) फलम् ॥

एतद् रहस्यं(म्) परमं(म्), ब्रह्मणो हृदि संस्थितम्।
ब्रह्मा प्रोवाच शक्राय, शक्रः(फ्) प्रोवाच मृत्यवे ॥

मृत्युः(फ्) प्रोवाच रुद्रेभ्यो, रुद्रेभ्यस्तण्डिमागमत्।
महता तपसा प्राप्तस्-तण्डिना ब्रह्मसद्मनि ॥

तण्डिः(फ्) प्रोवाच शुक्राय, गौतमाय च भार्गवः।
वैवस्वताय मनवे, गौतमः(फ्) प्राह माधव ॥

नारायणाय साध्याय, समाधिष्ठाय धीमते।
यमाय प्राह भगवान्, साध्यो नारायणोऽच्युतः ॥

नाचिकेताय भगवा- नाह वैवस्वतो यमः।
मार्कण्डेयाय वार्ष्णेय, नाचिकेतोऽभ्यभाषत ॥

मार्कण्डेयान्मया प्राप्तो, नियमेन जनार्दन।
तवाप्यहममित्रघ्न स्तवं, दद्यां(म्) ह्यविश्रुतम् ॥

स्वर्ग्यमारोग्यमायुष्यं(म्), धन्यं(म्) वेदेन सम्मितम्।
नास्य विघ्नं(म्) विकुर्वन्ति, दानवा यक्षराक्षसाः।
पिशाचा यातुधाना वा, गुह्यका भुजगा अपि ॥

यः(फ्) पठेत शुचिः(फ्), पार्थ ब्रह्मचारी जितेन्द्रियः।
अभग्नयोगो वर्षं(न्) तु, सोऽश्वमेधफलं(म्) लभेत् ॥

नमः(श्) शिवाभ्यां(न्) नवयौवनाभ्यां(म्) परस्परास्क्लृष्ठ वपुर्धराभ्यां।
नगेन्द्र कन्यां(म्) वृषकेतनाभ्यां(न्) नमो नमः(श्) शंकर पार्वतीभ्यां ॥

उमा कान्ताय कान्ताय सर्वाभीष्ट प्रदायिने
श्रीगिरीशाय देवाय मल्लिनाथाय मंगलम्

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि
अष्टचत्वारिंशोध्यायः। श्री महादेवसहस्रनामस्त्रं(म्) समाप्तम्।
श्रीकृष्णार्पणमस्तु।
श्रीशिवार्पणमस्तु।

